**दिनाङ्कः:- 12.04.2024**
**प्रात:- 06:55**

## प्रधानमन्त्री-चीनदेश:

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रत्यपादयत् यत् भारत-चीन-देशयो: मध्ये विषम-सम्बन्धान् दूरीकर्तुम् उभयो: देशयो: सीम-प्रसङ्गानां तात्कालिकं समाधानम् आवश्यकम् अस्ति। श्रीमोदी अकथयत् यत् भारतचीनयोर्मध्ये स्थायि-शान्तिपूर्ण-सम्बन्ध न केवलं उभाभ्यां देशाभ्याम् अपितु समग्र-विश्वाय महत्वपूर्णमस्ति। एकस्मिन् साक्षात्कारे प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् राजनयिक-सैन्य-स्तरयो: सकारात्मक-रचनात्मक-वार्तयो: माध्यमेन उभौ देशौ सीम्नि शान्ति-स्थायित्वं च स्थापयितुं समर्था: भविष्यत:। श्रीमोदी भारतीय-लोकतन्त्र-विषयेऽपि उक्तवान् यत् मतदातृणां नैरन्तर्येण प्रवर्धमानं सहभागित्वं लोकतन्त्रं प्रति जनानां विश्वासस्य प्रमाणमस्ति। विश्वस्य बृहत्तमस्य लोकतन्त्रस्य रूपेण वर्षे नवदशाधिक-द्विसहस्रतमे सामान्यनिर्वाचने षष्टि: कोटि: अधिक-जना: मतदानं कृतवन्त:। साम्प्रतं यावत् अस्य वर्षस्य सामान्यनिर्वाचने देशस्य सप्तनवति-कोट्यधिका: मतदातार: स्वीय-मताधिकारस्य उपयोगं करिष्यन्ति। एतदर्थं आदेशे दशलक्षाधिकानि मतदानकेन्द्राणि अपि निर्मीयन्ते।

## तृतीय-निर्वाचनाधिसूचना

लोकसभा-निर्वाचनानां तृतीय-चरणाय अधिसूचना अद्य सम्प्रसारयिष्यते। चरणेऽस्मिन् दश-राज्यानां, द्वयो: केन्द्रशासित-प्रदेशयो:, चतुर्णवति-लोकसभा-आसनानाञ्कृते मे-मासे सप्तमे दिनांके मतदानं भविष्यति। मध्य-प्रदेशस्य बेतुल-निर्वाचनस्य अधिसूचनापि अद्य एव प्रसारयिष्यते। अस्मिन् संसदीय-निर्वाचन-क्षेत्रे द्वितीय-चरणे मतदानं भवितुं इति निश्चितम्, परं बहुजन-समाज-पार्टीति दलस्य प्रत्याशिन: निधनात् निर्वाचन-प्रक्रिया स्थगिता जाता। चरणेऽस्मिन् ऊनविंशति: तारिकां यावत् नामांकनं प्रपूरयिष्यति।

## प्रधानमन्त्री-प्रचाराभियानम्

विविध-राजनैतिक दलानां शीर्षनेतार: लोकसभा निर्वाचनस्य प्रथमचरणाय नैर्वाचनिक-जनसभासु प्रचाराय निमग्ना: सन्ति। अवधेयं वर्तते यत् अस्य मासस्य नवदशदिनांके एकविंशति राज्यानां केन्द्रशासित-प्रदेशानाञ्च द्वयधिकैकशतम् आसनेभ्य: मतदानं भविष्यति। भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी कथितवान् यत् अस्य वर्षस्य निर्वाचनं विकसित-भारत-अभियानाय ऊर्जास्वरूपं वर्तते। ह्य: राजस्थानस्य करौली जनपदे एका जनसभा श्रीमोदिना सम्बोधिता।

इत: प्राक् श्रीमोदिना ऋषिकेश-उत्तराखण्डे अपि जनसभा: सम्बोधिता:, प्रोक्तञ्च यत् विगत-दश वर्षेषु भारतीय-जनतान्त्रिक संयुत्या अशेष-राष्ट्राय सुदृढता प्रदत्ता। तेन एतदपि प्रोक्तं यत् यदा देशे निर्बल-प्रशासनेन शासनं कृतम्, तदा आतंकिनां सशक्तता सुदृढा जाता। प्रधामन्त्रिणा भणितं यत् तदीय प्रशासनेन वन-रेंक-वन-पेंशन इति नामधेया योजना सैनिकेभ्य: प्रारब्धा। कांग्रेसदलस्य पूर्वाध्यक्ष: राहुलगान्धी कथितवान् यत् अस्मिन् देशे विषयद्वयमस्ति- वृत्याभाव: महर्घता च। परञ्च इतरेभ्य: विषयेभ्य: अत्यधिकं महत्वं दीयते। असौ ह्य: राजस्थानस्य अनूपगढ-स्थले एकां जनसभां सम्बोधयन् आसीत्।

## आई.पी.एल.

आई.पी.एल् इत्यस्यां क्रिकेट-स्पर्धा-मालिकायां, मुम्बय्या: वानखेडे-क्रीडाङ्णे मुम्बई-इंडियन्सदलेन रॉयल-चैलेन्जर्स-बेंगलुरूदलं सप्त-स्तोभै: पराजितम्। अद्य लखनऊ-नगरस्य भारतरत्न-श्री अटल-बिहारी वाजपेयी-एकाना-क्रिकेट-क्रीडांगणे लखनऊसुपरजायन्ट्सदलस्य स्पर्धा डेल्हीकैपिटल्स दलेन सह भविष्यति। यस्या: प्रसारणं सार्धसप्तवादने भविष्यति।

**।। ति वार्ता : ।।**